ॐ नमः परदेवतायै

# गुप्तसाधनतन्त्रम्

## प्रथमः पटलः

कैलाशशिखरे रम्ये नानारत्नोपशोभिते ।

तं कथञ्चित्सुखासीनं भगवन्तं त्रिलोचनमं ॥ १ ॥

प्रपच्छ परया भक्त्या देवी लोकहितेच्छया ।

श्रीदेव्यिवाच --

देवदेव महादेव लोकानुग्रहकारक ॥ २ ॥

कुलाचारस्य माहात्म्यं पुरैव सूतं त्वया ।

तत्कथं गोपितं देव मम प्राणेश्वर प्रभो ॥ ३ ॥

कथयस्व महाभाग यद्यहं तव वल्लभा ।

श्रीशिव उवाच --

शृणु देवि प्रवक्ष्यामि सारात्सारं परात्परम् ॥ ४ ॥

तव स्नेहान्महादेवि दासोऽस्मि तव सुन्दरि ।

तां कथां कथयिष्यामि सावधानाऽवधारय ॥ ५ ॥

कुलाचारं महाज्ञानं गोप्तव्यं पशुसंकटे ।

प्रगोप्तव्यं महादेवि स्वयोनिनिरिव पार्वति ॥ ६ ॥

वेदागम-पुराणानि वेदशास्त्राणि पार्वति ।

एतन्मध्ये सारभूतं कुलाचारं सुदुर्लभम् ॥ ७ ॥
वक्रकोटि सहस्रैस्यु जिह्वा कोटि शतैरपि ।
कुलाचारस्य माहात्म्यं वर्णितूं नैव शक्त्यते ॥ ८ ॥
किंचन्मया तु चापल्यात् कथ्यते तच्छृणुष्व मे ।
शक्तिमूलं जगत्सर्वं शक्तिमूलं प्रवर्तते ॥ ९ ॥
शक्तिमाश्रित्य निवसेद्यत्र कुत्र प्रिये वसन् ।
साधकस्यार्चिता शक्तिः साधकज्ञानकारिणी ॥ १० ॥
इह लोके सुखं भुक्त्वा देवीदेहे प्रलीयते ।
साधकेन्द्रो महासिद्धिं लब्ध्वा याति हरेः प्रदम् ॥ ११ ॥
पंचाचारेण देवेशि कुलशक्तिं प्रपूजयेत् ।
नटी कापालिनी वेश्या रजकी नापिताङ्गना ॥ १२ ॥
ब्राह्मणी शूद्रकन्या च तथा भोपालकन्यका ।
मालाकारस्य कन्या च नवकन्याः प्रकीर्तिताः ॥ १३ ॥
विशेषर्ववव्ययुता सर्वा एव कुलाङ्गनाः ।
रूपयौवनसंपन्ना शील-सौभग्यशालिनी ॥ १४ ॥
पूजनीया प्रयत्नेन ततः सिद्धिर्भवेद् ध्रुवम् ।
सत्यं सत्यं महादेवि सत्यं सत्यं न संशयः ॥ १५ ॥

द्वितीयः पटलः

श्रीपार्वत्युवा --

साधने मां कृपानाथ मुहुः प्रष्टुं यदुत्सहे।

स्त्रियः स्वभाव-चपला भृशं शङ्के पुनः पुनः॥ १॥

यदुक्तं कृपया नाथ रहस्यं परमाद्भुतम्।

गुरुर्ब्रह्मा गुरुर्विष्णुगुरुर्देवो गुरुर्गतिः॥ २॥

गुरुस्तीर्थं गुरुर्वंशो गुरुर्दानं गुरुस्तपः।

गुरुरग्निर्गुरुः सूर्यः सर्वं गुरुमयं जगत्॥ ३॥

किं मनुना किं तपसा किमन्यत्तीर्थसेवया।

श्रीगुरोरर्च्चितौ पादै येन तेनार्च्चितं जगत्॥ ४॥

गुरोः पादोदकं येन शिरसा पुण्यभाग् भवेत्।

सर्वतीर्थजलं पुण्यं लभते नात्र संशयः॥ ५॥

इति तस्य गुरोर्व्यानं सत्त्वतः श्रोतुमुत्सहे।

लब्धत्वबद्धदेहो मां कथं वञ्चयसि प्रभो॥ ६॥

श्रीशंकर उवाच --

न वञ्चयामि देवि त्वां प्राणेभ्योऽपि गरीयसीम्।

स्त्रीणां स्वभावचापल्याद् गोपितं न प्रकाशितम्॥ ७॥

कथयामि तव स्नेहाच्छ्रीगुरोर्ध्यानमुत्तमम्।

प्रकाश्यं च कुलीनेषु न प्रकाश्यं पशौ क्वचित्॥ ८॥

कुलः शक्तिः स्माख्याता अकुलः शिव उच्यते।

तस्यां लीनो भवेद्यस्तु स कुलीनः प्रकीर्तितः॥ ९॥

कुलबृत्तं नमस्कृत्य गुरुं ध्यायेत्परांबुजे।

शरच्चन्द्रसमाभासं शरत्पंकजलोचनम्॥ १०॥

ईषद्धास्यं शारदीयं पूर्निन्दुसद्दशाननम्।

दिव्यस्त्रगम्बरधरं दिव्यगन्धानुलेपनम्॥ ११॥

सुरक्तशक्तिसंयुक्तं वामभागे मनोहरम्।

वराभयकरांभोजं सर्वलक्षणलक्षितम्॥ १२॥

सहस्त्रारे महापद्मे गुरुं शिरसि चिन्तयेत्।

एतत्ते कथितं देवि श्रिगुरोर्ध्यानमुत्तमम्॥ १३॥

गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन।

गुरोर्ध्यानं श्रुतं कल्प सर्वतन्त्रेषु गोपितम्॥ १४॥

क्रिया दीक्षा शुभ प्रोक्ता सर्वकार्यफलप्रदा।

बहुजन्मार्जिता पुण्या बहुभाग्यवशाद्यदि।

श्रीगुरुर्लभ्यते नाम तस्य ध्यानं तु कीद्दशम्॥ १५॥

कुलीनं श्रिगुरोर्ध्यानं श्रोतुमिच्छामि सांप्रतम्।

कथयस्व महाभाग य्द्यहं तव वल्लभा॥ १६॥

श्रीशङ्कर उवाच --

शृणु पार्वति वक्ष्यामि तव स्नेहात्परिप्लुतः।

रहस्यं श्रीगुरोर्ध्यानं यत्र धेयो च सो गुरुः॥ १७॥

सहस्त्रारे महाप्द्द्मे किंजल्कगण-शोभिते।

प्रफुल्लपद्मपत्राक्षीं घनपीनपयोर्धराम्  ॥ १८॥

सहस्त्रवद्नां नित्यां क्षीणमध्यां शिवां गुरुम्।

पद्मरागसमा भासां रक्तवस्त्रसुशोभिताम्॥ १९॥

रत्नकङ्कणपाणिं च रन्तनूपुरशोभिताम्।

शरदिन्दुप्रतीकाश-वस्त्रोद्भासित-कुण्डलाम्॥ २०॥

स्वनाथवामभागस्थां वराभयकरांबुजाम्।

इति ते कथितं देवि श्रिगुरोर्ध्यानमुत्तमम्॥ २१॥

गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन।

तृतीयः पटलः

श्रीपार्वत्युवाच --

देवदेव महादेव भक्तानां मुक्तिदायक।

तव प्रसादात् प्राणेश श्रुतं साधनमुत्तमम्॥ १॥

पञ्चांगोपासनं देव रहस्यादि पुरात्क्रिया।

तत्सर्वां ब्रूयतां देव यदि स्नेहोऽस्ति मां प्रति ॥ २ ॥

श्री ईश्वर उवाच --

दिवारात्रिप्रभेदेन जपन्मन्त्रमनन्यधीः ।

न्यूनाधिकजपेनैव दूषणं नास्ति पार्वति ॥ ३ ॥

मन्त्राचरेण देवेशि सर्वं कार्यं जपादिकम् ।

स्वेष्टाचारोऽत्र गदितो महामन्त्रस्य साधने ॥ ४ ॥

स्वेष्टाचारोऽत्र गदितो महामन्त्रस्य साधने च॑फ ।

प्रत्यह परमेशानि एकैकं विप्रभोजनम् ॥ ५ ॥

प्रात कालात् समारभ्य जपेन्मध्यन्दिनावधिः ।

पूजां कृत्वः साधकेन्द्रः पुतर्जपनमारभेत् ॥ ६ ॥

सायं मध्यो ततः त्वा भोजनं स्वेच्छया नयेत् ।

भक्ष्यं ताम्बूलमत्स्यं च भक्ष्यं द्रव्यं यथारुचि ॥ ७ ॥

भुञ्जानो वा हविष्यान्तं शाकं पावकमेव वा ।

एवं कृत्वा साधकेन्द्रो रात्रौ जपनमारभेत् ॥ ८ ॥

गते तु प्रथमे यामे तृतीय प्रहरावधि ।

स्ववामे शक्तिं संस्थाप्य जपेन्मन्त्रमनन्यधीः ॥ ९ ॥

शक्तियुक्तो भवेन्मर्त्यः सिद्धो भवति नान्यथा ।

कुलशक्तिं विना देवि यो जपेत्स तु पामरः ॥ १० ॥

सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि।
पुनश्च विषुवे चैव पूजयेत् विभवावधि॥ ११॥
कुमारिं पूजयित्वा तु भोजयेद्विधिपूर्वकम्।
शतमष्टोत्तरं चैव ब्राह्मणान् भोजयेत्ततः॥ १२॥
शक्तिपूजां ततः कृत्वा भोजयेच्च यथाविधि।
गुरवे दक्षिणां दद्यात्स्वर्णवस्त्रसमन्विताम्॥ १३॥
यद्यदिष्टतमं लोके गुरवे तन्निवेदयेत्।
गुरोः सन्तोषमात्रेण किं न सिध्यति भूतले॥ १४॥
गुरुदेव परं ब्रह्म नास्ति तत्त्वं गुरोः परम्।
एवं कृते मन्त्रसिद्धिर्भवत्येव न संशयः॥ १५॥
सर्वसिद्धीश्वरो भूत्वा विचरेद् भैरवो यथा।
स धन्यः स च विज्ञानी शिवतुल्यो न संशयः॥ १६॥

## चतुर्थः पटलः

श्रीशंकर उवाच

शृणु पार्वति वक्ष्यामि गुप्ताद् गुप्ततरं महत्।
प्रकाशात्सिद्धिहानिः स्यत्तस्माद्यत्नेन गोपयेत्॥ १॥
स्वशक्तिं परशक्तिं वा दीक्षितां यौवनान्विताम्।

विदग्धां शोभनं शय्याघृणालल्जां विवर्जिताम्॥ २॥
तामानीय साधकेन्द्रो दद्यात्पाद्यादिकं शुभम्।
पंचाचारेण तां शक्तिं पूजयित्वा यथाविधि॥ ३॥
शतं शिर्षे शतं भाले शतं सिन्दूरमण्डले।
शतं मुखे शतं कण्ठे शतं हृदयमण्डके॥ ४॥
शतयुग्मं स्तनद्वन्द्वे शतं नाभौ जपेत् सुधी।
योनिपीठे शतं जप्त्वा साधकस्थिरमानस॥ ५॥
एवं सहस्रं संजप्त्वा देवीं तत्र विचिन्तयेत्।
स्वयं शिवस्वरूपं च चित्र्येत्साधकोत्तमः॥ ६॥
शिवमन्त्रेण देवेशि स्वलिंगं पूजयेदथ।
ताम्बूलं तन्मुखे दत्त्वा साधको हृष्टमानसः॥ ७॥
तदनुज्ञां समादाय योनौ लिंगं विनिक्षिपेत्।
धर्माधर्मं हविर्दीप्ते आत्माग्नौ मनसा श्रुचा॥ ८॥
सुषुम्णावर्त्मना नित्यमन्नवृत्तिं जुहोम्यहम्।
स्वाहेत्यनेन मन्त्रेण हुनेत्सर्वसमृद्धये॥ ९॥
ततो जपेत्सहस्रं वै शक्तियुक्तो भवेन्नरः।
शतं वाऽपि प्रजप्तव्यं ततो न्यूनं न कारयेत्॥ १०॥
पूर्णाहुतिं ततो दद्यान्मन्त्रेणानेन साधकः।

प्रकाशाऽकाशमन्त्राभ्यामेव मन्त्रान्मतः श्रुचा ॥ ११ ॥
धर्माधर्मकलास्नेहपूर्णवह्नौ जुहोम्यहम् ।
स्वाहेत्यनेन मन्त्रेणं पूर्णहुतिं समाचरेत् ॥ १२ ॥
शुक्रोत्सारणकाले च देव्या शुक्रं समर्पयेत् ।
एवं कृत्वा मन्त्रसिद्धिर्नात्र कार्या विचारणा ॥ १३ ॥
यं यं प्रार्थयते कामं तं तं प्राप्नोति निश्चितम् ।
रोगी रोगात्प्रमुच्येत दरिद्रश्च धनाधिपः ॥ १४ ॥
वायुतुल्यबलो लोके दुर्जयः शत्रुमर्दनः ।
कामतुल्यश्च नारीणां रिपूणां शमनोपमः ॥ १५ ॥
यद्यत्कल्पेत तत्तत् सिद्ध्यति भूतले ।
अष्टैश्वर्यमवाप्नोति स एव श्रीसदाशिवः ॥ १६ ॥

पञ्चमः पटलः

श्रीपार्वत्युवाच

भो ईश्वर जगत्तात मम प्राणेश्वर प्रभो ।
इदानीं श्रोतुमिच्छामि मासाधिकपुरस्क्रियाम् ॥ १ ॥
श्रीशिव उवाच
एकमासेन षड्लक्षं द्विमासे रविलक्षकम् ।

मासत्र्येण देवेशि वयुयुग्मकलक्षकम्॥ २॥
चतुर्मासे महेशानि त्रिंशल्लक्षं सदा जपेत्।
पंचमासे महेशानि त्रिंशल्लक्षं सदा जपेत्॥ ३॥
षण्मासे प्रजपेन्मन्त्रं षट्त्रिंशल्लक्षकं सदा।
सप्तमासे महेशानि द्विचतुर्लक्षकं सुधीः॥ ४॥
अष्टमासे सुरेशानि गजवेदं च लक्षकम्।
मासे तु नवमे देवि वेदबाणं च लक्षकम्॥ ५॥
दशमासे तु संप्राप्ते षष्ठिलक्षं च संजपेत्।
मासे चैकादशे प्राप्ते लक्षं बाणरसं जपेत्॥ ६॥
वर्षे पूर्णे महेशानि शतलक्षं जपेत्सुधीः।
अनेनैव विधानेन यो जपेद् भुवि मानवः॥ ७॥
केवलं जपमात्रेण मन्त्रसिद्धिर्भवन्ति हि।
पंचाचरेण देवेशि सर्वं कार्यं जपादिकम्॥ ८॥
पूर्वत् शक्तिपूजा च कुमारीं पूजयेत्।
यथाशक्ति ब्राह्मणांश्च भोजयेद् विधिपूर्वकम्॥ ९॥
तथाऽनेन प्रकारेण शक्तिं भोजनमाचरेत्।
शक्तिं विना महेशानि सदाऽहं शवरूपकः॥ १०॥
शक्तियुक्तो यदा देवि शिवोऽहं सर्वकामदः।

शक्तियुक्तं जपेन्मन्त्रं न मन्त्रं केवलम् जपेत्॥ ११ ॥

सावित्रीसहितो ब्रह्मा सिद्धश्च नगनन्दिनि।

द्वारवत्यां कृष्णदेवो सिद्धोऽभूत्सत्यया सह॥ १२ ॥

यथा गोपवधू संगान् मम सिद्धिर्वरानेन।

स शिवोऽहं महादेवि केवलं शक्तियोगतः॥ १३ ॥

शक्तियुक्तेन देवेशि यदि सिद्धिर्न जायते।

तदैव परमेशानि मम कथ्यं वृथा भवेत्॥ १४ ॥

गंगा काशी प्रयागादि पुष्करं नैमिषं तथा।

बदरी च तथा रेवा उत्कलं गण्डकी तथा॥ १५ ॥

सिन्धुः सरस्वती चैव पीठानि विविधानि च।

सर्वं त्यक्त्वा महेशानि स्त्रीसङ्गं यत्नतश्चरेत्॥ १६ ॥

स्त्रीसंगे सिद्धिमाप्नोति मम वाक्यं न चावारुण्यश्चैव पठते नित्यं तं

रअन्त्यषकनअकारादिश्री शिव उवाक्षकारान्ता अस्थिमधे स्थिताः

सदथा।

यद् दत्तं जलगण्डूषं शक्तिवक्त्रे सुरेश्वरि॥ १७ ॥

सिंधुरूपं परेशानि तज्जलं नात्र संशयः।

अन्नन्तु परमेशानि स्थूलाचलसमं भवेत्॥ १८ ॥

एवं संस्थात्तु सर्वत्र ज्ञातव्यं कुलसाधकैः।

सदेष्टदेवी भावेन पूजयेत्तां च यत्नतः॥ १९॥
क्रोधान्मोहाच्छलाद् वापि यदि पूजां न कारयेत्।
कल्पकोटि शतेनापि तस्य सिद्धिनं जायते॥ २०॥
एतत्सिद्धतमं देवि तव स्नेहात्प्रकाशितम्।
न वक्तव्यं पशोरग्रे शपथो मे त्वयि प्रिये॥ २१॥

षष्ठः पटलः

श्रीपार्वत्युवाच

शिवशंकर ईशान ब्रूहि मे परमेश्वर।
दक्षिणायाः प्र्कारन्तु सूचितं न प्रकाशितम्॥ १॥
इदानीं श्रोतुमिच्छामि यदि तेऽस्ति कृपा मयि।
दक्षिणा सिद्धिदा प्रोक्ता त्रैलोयेशु सुदुर्लभा॥ २॥
यामाराध्य महाविष्णुः पालयत्यखिलं जगत्।
यामाराध्य महदेवः सृष्टिकर्ता प्रजापतिः॥ ३॥
संहारकाले च हरो रुद्रमूर्तिधरः परः।
तां विद्यां वद ईशान यद्यहं तव वल्लभा॥ ४॥

श्रीशिव उवाच

दक्षिणायाः प्रकारन्तु कालितन्त्रादि यामले।

अतः परं महेशानि विरक्त भव सुन्दरि ॥ ५ ॥

श्रीपार्वत्युवाच

एतत्प्रकारं देवेश त्वया नो चेत्प्रकाशितम् ।

प्राणत्यागं करिष्यामि पुरस्तस्ते न संशयः ॥ ६ ॥

श्रीशिव उवाच

शृणु देवि प्रवक्ष्यामि दक्षिणाकाल्युत्तमम् ।

यस्याः प्रसंगमात्रेण भवाब्धौ न निमज्जति ॥ ७ ॥

स्वरात्रं वह्निसंयुक्तं वामनेत्रभूषितम् ।

बिन्दुनादं कलायुक्तं मन्त्रं त्रैलोक्यमोहनम् ॥ ८ ॥

भैरवोऽस्य ऋषिः प्रोक्त उष्णिक्छन्द उदाहृतः ।

दक्षिणा कालिका प्रोक्ता देवता सर्वसिद्धिदा ॥ ९ ॥

मायाबीजं बिजमस्याः कूर्चबीजं च शक्तिकम् ।

निजबीजं महेशानि कीलकं सर्वमोहनम् ॥ १० ॥

धर्माथकाममोक्षेषु विनियोगः प्रकीर्तितः ।

कालीतन्त्रादि तन्त्रेषु पूजा योगादि पार्वति ॥ ११ ॥

कथितं च मया पूर्व किमन्यच्छ्रोतुमिच्छसि ।

श्रीदेव्युवाच

ध्यानानुरूपिणीं मूर्तिं यदि पूजादिकं चरेत् ॥ १२ ॥

आचारः कीदृशो  नाथ कं वा तत्र प्रपूजयेत्।
भूतशुद्धौ यदा नाथ यदि देहन्तु नाशयेत्॥ १३॥
कुत्रस्थले भवेद् दृष्टिरमृतं कुत्र संचरेत्।
आलीढ कीदृशं नाथ प्रत्यालीढं च कीदृशम्॥ १४॥
कथं वा कालिका देवी श्मशानालयवासिनी।
निशा वा कीदृशी नाथ कीदृशी वा महानिशा॥ १५॥
भावभेदे महादेव तद् वदस्व दयानिधे।
श्रीशिव उवाच
शृणु देवि प्रवक्ष्यामि यान्यां त्वं परिपृच्छसि॥ १६॥
तत्सर्वं संप्रक्ष्यामि सावधानावधारय।
पूजायः पूर्वदिवसे आदौ क्षीरादिकं चरेत्॥ १७॥
हविष्यान्नं भोजनं च अथवाऽपि निरामिषिम्।
ततः परस्मिन्दिवसे प्रातः स्नात्वा तु साधकः॥ १८॥
नित्यपूजां समाप्यादौ देववत् शुद्धमानसः।
गुरुर्वा गुरुपुत्रो वा गुरुपत्नी च सुव्रते॥ १९॥
आगमोक्त विधानेन अधिकारी गुरुः स्वयम्।
गिरोरभावे देवेशि स्वयं पूजादिकं चरेत्॥ २०॥
एभिर्विना महेशानि तान्त्रिकैर्दैशिकैर्यदि।

पूज्यते तत्फलं सर्वं गृह्यते यक्षराक्षसैः॥ २१।
अत एव महेशानि गुरुः कर्ता विधीयते।
ब्रह्मरूपं गुरुः साक्षाद्यदि पूजादिकं चरेत्॥ २२॥
तत्सर्वं महेशानि शतकोटिगुणं भवेत्।
अथवा परमेशानि स्वयं पूजादिकं चरेत्॥ २३॥
स्वयं पूजादिकं कृत्वा पूजाद्रव्यादिकं च यत्।
तत्सर्वं परमेशानि गुरोरग्रे निवेदयेत्॥ २४॥
गुरौ दत्तं महेशानि सर्वं कोटिगुणं भवेत्।
गुरुपत्नी महेशानि यदि पूजादिकं चरेत्॥ २५॥
बलिदानादिकं सर्वं मोहं तत्र विवर्जयेत्।
होमीयद्रव्यमानीय दैव्यग्रे स्थापयेद् बुधः॥ २६॥
गुरुं विलंध्य शास्त्रेऽस्मिन्नाधिकारी सुरेश्वरि।
गुरुणा यत्कृतं देवि तत्सर्वमक्षयं भवेत्॥ २७॥
ऋत्वक्पुत्रादयो देवि स्मृत्युक्ता बहवः प्रिये।
तन्त्रोक्ते परमेशानि नान्यवक्त्रं विलोकयेत्॥ २८॥
इष्टपूजादिकं सर्वं न कुर्याज्जनसन्निधौ।
तस्य सर्वार्थहानिः स्यात्क्रुद्धा भवति चण्डिका॥ २९॥
वरं पूजा न कर्तव्या न कुर्याज्जनसन्निधौ।

अन्यसन्निहिते देवि यदि पूजारतो भवेत्॥ ३० ॥
विष्णुतन्त्रोक्तपूजादि तत्तन्मुद्रां प्रदर्शयेत्।
तेन पूजादिकं जातं न व्यक्तव्यं कदाचन॥ ३१ ॥
वाम कुक्षिस्थितं पापं पुरुषं कज्जलप्रभम्।
तस्य संहरणार्थाय महती प्रकटीकृता॥ ३२ ॥
लिंगदेहो महेशानि तस्य देहो न संशयः।
पापदेहे भवेद्दग्धं स्वदेहं नैव नाशयेत्॥ ३३ ॥
आलीढं नामपादं तु प्रत्यालीढं तु दक्षिणम्।
संहाररूपिणी काली जगन्मोहनकारिणी॥ ३४ ॥
वह्निरूपा महामाया सत्यं सत्यं न संशयः।
अत एव महामाया श्मशानलयवासिनी॥ ३५ ॥
आलीढपादा सा देवी प्रत्यालीढा क्षणे क्षणे।
अनन्तरूपिणी श्यामा कैर्वक्तुं शक्यते प्रिये॥ ३६ ॥
अनन्तरूपिणी श्यामा चर्तुर्वगफलप्रदा।
गुरुणा यस्य यत्प्रोक्तं तत्तस्य ब्रह्म संमितम्॥ ३७ ॥
निशा तु परमेशानि सूर्ये यास्तमुपागते।
प्रहरे च गते रात्रौ घटिके द्वे परे च ये॥ ३८ ॥
महानिशा समाख्याता ततश्चातिमहानिशा।

अर्धरात्रे गते देवि पञ्चभावेन पूजयेत्॥ ३९॥
दशदण्डे तु या पूजा तत्सर्वमक्षयं भवेत्।
अष्टक्रोशे महादेवि तत्सर्वममृतोपमम्॥ ४०॥
सप्तमे क्रोशके देवि सर्वं क्षीरोपमं भवेत्।
अष्टकमक्रोशके देवि द्रव्यतुल्यं न संशयः॥ ४१॥
अतः परं परेशानि विषतुल्यं न संशयः।
एतत्सर्वं महेशानि दण्डभावं मयोदितम्॥ ४२॥
दिव्यवीरमते देवि तत्त्वज्ञानेन पूजयेत्।
पञ्चतत्त्वं समानीय यदि पूजा नरो भवेत्॥ ४३॥
कालाकालं महेशानि विचारं नात्र वर्जयेत्।
अर्धरात्रे गते देवि कुलपूजा प्रकीर्तिता॥ ४४॥
तत्तद्यन्त्रादिरूपेण सर्वं पूजादिकं चरेत्।
अतिस्नेहेन देवेशि तव स्थाने प्रकाशितम्॥ ४५॥
पशोरग्रे प्रकाशं वै कदाचिन्नैव कारयेत्॥ ४६॥

सप्तमः पटलः

श्रिदेव्युवाच

भूतनाथ जगद्वन्द्य जगन्निस्तारकारक।

त्वां विना संशयच्छेत्ता नहि त्राता च कुत्रचित्॥ १॥
ब्रूहि ये जगतां नाथ तत्त्वं परमदुर्लभम्।
येन ज्ञानप्रमादेन निर्वाणपदगीयते॥ २॥
कथ्यतां परमेशान यदि स्नेहोऽस्ति मां प्रति।
तव स्नेहान् महादेव मण्डिताऽहं न संशयः॥ ३॥
श्रीशिव उवाच
त्रैलोक्ये वातुलः ख्यातो वातुलोऽहं सुरेश्वरि।
वातुलस्य वचः श्रुत्वा प्रतीता त्वं कथं प्रिये॥ ४॥
त्वमेव परमं तत्त्वं किमन्यच्छ्रोतुमिच्छसि।
अतः परं महेशानि विरता भव सुन्दरि॥ ५॥
श्रीदेव्युवाच
यदि तत्त्वं महादेव न मे कथयसि प्रभो।
प्राणत्यागं करिष्यामि पुरतस्ते न संशयः॥ ६॥
श्रीभगवानुवच
सर्वतन्त्रेषु देवेशि कथितं च मया पुरा।
उक्तं रूपं च देवेशि किं पृच्छसि पुनः पुनः॥ ७॥
तव स्नेहान्महादेवि किं मया न प्रकाशितम्।
इमां कथां महादेवि व्यक्तरूपे च मा वद॥ ८॥

श्रीदेव्युवाच

तवैव पुरतः स्थित्वा यदुक्तं च मया पुरा।

तद् वाक्यं परमेशानं कथ मिथ्या भविष्यति॥ ९॥

श्रीशिव उवाच

शृणु देवि प्रवक्ष्यामि तत्त्वं परमदुर्लभम्।

मन्त्रोच्चारक्रमेणैव तत्सर्वं कथयामि ते॥ १०॥

भान्तमाकारसंयुक्तं पात्रं वायुयुतं कुरु।

बिन्दुयुक्तं पुनर्भान्तं माकारं बिन्दुसंयुतम्॥ ११॥

चन्द्रबीजं समुच्चार्य अंकारं तदनन्तरम्।

पुनर्भान्तं तकारं च चन्द्रवायुयुतं शिवे॥ १२॥

पुनर्भान्तं महेशानि पञ्चमस्वरसंयुतम्।

खान्तं वह्निसमारूढमाकारसंयुतम् कुरु॥ १३॥

पुनर्भान्तं महेशानि सूर्यस्वरविभूषितम्।

तान्तमुकारसंयुक्त धान्तमकारसंयुतम्॥ १४॥

पंचतत्त्वमिदं देवि सर्वतन्त्रेषु गोपितम्।

यदि विप्रो भवेद्देवि पंचतत्त्वपरायणः॥ १५॥

सत्यं सत्यं महेशानि परतत्त्वे प्रलीयते।

यथा जलं तोयमध्ये लीयते  परमेश्वरि॥ १६॥

तथैव तत्त्वमेकारं लीयते परमेश्वरि ।

क्षत्त्रियः परमेशानि सहयोगे वसेद् ध्रुवम् ॥ १७ ॥

वैश्यस्तु लभते देवी स्वरूपं नात्र संशयः ।

शूद्रस्तु परमेशानि सहलोके वसेत्सदा ॥ १८ ॥

एतदन्यो महेशानि यदि तत्त्वपरायणः ।

सत्यं सत्यं महेशानि भुंक्ते फलमखण्डितम् ॥ १९ ॥

सेनानी परमेशानि देवी देहे प्रलीयते ।

शोधनं च मया प्रोक्तं नीलतन्त्रादियामले ॥ २० ॥

अष्टमः पटलः

श्रीशिव उवाच

अतः परं प्रवक्ष्यामि सिद्धादिचक्रमुत्तमम् ।

तस्य विज्ञानमात्रेण मन्त्रसिद्धिर्भवेद् ध्रुवम् ॥ १ ॥

यदि नो परमेशानि मन्त्रसिद्धिर्भवेन्न हि ।

चतुरस्त्रं लिखेत्कोष्ठं यावत्षोडशकोष्ठकम् ॥ २ ॥

तावदङ्गान् प्रत्यत्नेन रचयेत्साधकोत्तमः ।

तत्र वर्णान् लिकेन्मन्त्री प्रकारं शृणु सादरम् ॥ ३ ॥

इन्द्राग्निरुद्द्र नवनेत्र युगार्कदिक्षु ।

ऋत्वष्टषोडशचतुर्भुरजभौतिकेषु ।

पातालपंचदशवह्नि हिमांशु कोष्ठे।
वर्णाल्लिखेल्लिपिभवान् क्रमशस्तु धीमान्॥ ४॥
सिद्धिः सिद्ध्यति कालेन साध्यस्तु जपहोमतः।
सुसिद्धो ग्रहणादेव रिपुमूलं निकृन्तति॥ ५॥
इत्यादिकं महादेवि पूर्वाम्नाये मयोदितम्।
नामानुरूपमेतेषां शुभाशुभफलं भवेत्॥ ६॥
शृणु देवि प्रवक्ष्यामि गणाक्रममुत्तमम्।
नामाद्यक्षरतो देवि यावन्मन्त्रादि साक्षरम्॥ ७॥
कादि अन्तं थादि धान्तं गादि ङान्तं धनान्विते।
दादि खान्तं चादि दान्तं शादि धान्तं जनान्तिके॥ ८॥
टादिपान्तं पादि चान्तं ठादिवान्तं  ठभान्तिके।
डादिमान्तं त्रादिफान्तं णादि लान्तं तलान्तिके॥ ९॥
वर्णत्र्यं महेशानि कोष्ठे पञ्चदशे प्रिये।
आदि कोष्ठे चतुर्वर्णं विलिखेत्साधकोत्तमः॥ १०॥
वर्णाष्टिकं गृहीत्वा तु कथ्यते तव सुव्रते।
लोष्ठे स्थितं समादाय गणनामाचरेत्सुधीः॥ ११॥
नामाद्यक्षरसंयुक्तं सिद्धकोष्ठं प्रकीर्तितम्।
अथात संप्रवक्ष्यामि पूजाकारस्तु सिद्धिदम्॥ १२॥

यद्विना परमेशानि नहि सिद्धिः प्रजायते।
शालग्रामे मणौ यन्त्रे  प्रतिमायां सुरेश्वरि॥ १३॥
पुस्तिकायां च गंगायां सामान्ये च जले तथा।
अथवा पुष्पयन्त्रेण पूजयेच्छिवलिंगके॥ १४॥
यन्त्रभेदेन देवेशि फलं सम्यक् प्रजायते।
शालग्रामे शतगुणं मणौ तद्वत् फलं भवेत्॥ १५॥
यन्त्रे लक्षगुणं प्रोक्तं प्रतिमायां तथैव च।
पुस्तिकायां च गंगायां समानफमीरितम्॥ १६॥
सामान्ये च जले देवि पूजादि दोषशान्तये।
पुष्पयन्त्रे महेशानि पूजनात्सर्वसिद्धिभाक्॥ १७॥
शिवलिंगे महेशानि अनन्तफलमीरितम्।
न कुर्यात् पार्थिवे लिंगे देवीपूजाद्काः क्रियाः॥ १८॥
पार्थिवे पूजनाद् देवि सिद्धिहानिः प्रजायते।
यदि दैवान्महेशानि मृत्तिकास्खलनं भवेत्॥ १९॥
तदा वर्षसहस्राणि नरके पूर्णशोभिते।
कुम्भीपाके महाघोरे पच्यते पितृभिः सह॥ २०॥
अत एव महेशानि पार्थिवे नहि पूजयेत्।
................ समानीय लिंगं निर्माय यत्नतः॥ २१॥

तल्लिंगे पूजनाद्देवि सर्वसिद्धियुतो भवेत्॥ २२॥

नवमः पटलः

श्रीशिव उवाच

अथातः संप्रवक्ष्यामि धनदां सर्वसिद्धिदाम्।
यामाराध्य महादेवीं कुबेरो धननायकः॥ १॥
यत्प्रसादान्महेशानि रमेच्च त्रिदशेश्वरः।
तां विद्यां परमेशानि शृणुष्व वरवर्णिनि॥ २॥
दान्तं बिन्दुसमायुक्तं महामायां हरिप्रियाम्।
रतिप्रिये ततः पश्चात् वह्निजाया ततः परम्॥ ३॥
नवाक्षरो महामन्त्रो द्रुतं सिद्धिप्रदायकः।
अनया सदृशी विद्या अनया सदृशो जपः॥ ४॥
अनया सदृशी सिद्धिर्मम ज्ञाने न वर्तते।
शतवक्त्रो यदि भवेत्तावद्वक्तुं न शक्यते॥ ५॥
पंचवक्त्रेण देवेशि किं मया कथ्यतेऽधुना।
कुबेरोऽस्य ऋषिः प्रोक्तः पंक्तिश्छन्द उदाहृतः॥ ६॥
देवता धनदा प्रोक्ता सर्वसिद्धिप्रदायिनी।
धर्मार्थकाममोक्षांश्च चतुर्वर्गफलप्रदा॥ ७॥

षड्दीर्घमायया चैव षडङ्गन्यासमाचरेत्।
ध्यानमस्य प्रवक्ष्यामि येन सिद्धो भवेन्नरः॥ ८॥
देवीं काञ्चनतुल्यविमलां रक्तांशुकाच्छादिताम्।
हेमां भोजयुगाभयांकुशकरां रत्नोल्लसत्कुण्डलाम्।
सर्वाभीष्टफलप्रदां त्रिनयनां नागेन्द्रहारेज्ज्वलाम्।
वन्दे सर्वभयापहां त्रिजगतां पापापहारीं वराम्॥ ९॥
स्वकीयात्मस्वरूपां तां भावयेच्चित्स्वरूपिणीम्।
एवं ध्यात्वा महेशानि मानसैः पूजनं चरेत्॥ १०॥
अर्घ्यपात्रं स्थापयित्वा धेनुयोनिं प्रदर्शयेत्।
पीठपूजां ततः कृत्वा ततः पीठमनुं जपेत्॥ ११॥
आधारशक्तिमारभ्य योजेत्पद्मासनं प्रिये।
प्रणवादि नमोऽन्तेन पूजयेत्साधकाऽग्रणीः॥ १२॥
पुनर्ध्यात्वा महेशानि मूलेनावाहनं चरेत्।
षडंगानि  च संपूज्य जीवन्यासं समाचरेत्॥ १३॥
मूलमन्त्रं समुच्चार्य ततो द्रव्यं समुच्चरेत्।
देवतायै ततः पस्चाद्योगात्मकमनुं स्मरेत्॥ १४॥
पाद्याद्यैः पूजयेद्देवीं यथाविभवविस्तरैः।
यन्त्रमस्याः प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते॥ १५॥

नवयोन्यात्मकं चक्रं विलिखेत्कर्णिकोपरि।
द्विदलं पद्ममालिख्य तुरस्त्रं ततो बहिः॥ १६॥
कोणेषु वज्रं संलिख्य मध्ये बीजं समुल्लिखेत्।
इदं यन्त्रं महेशानि साक्षाद्देवीस्वरूपकम्॥ १७॥
लक्ष्मीं पद्मां पद्मालयां श्रियं चैव हरिप्रियाम्।
शर्वां च कमलां चैव अरजां चंचलां तथा॥ १८॥
लोलां प्रणवोपेतां नमोऽन्तेन प्रपूजयेत्।
पुत्रमध्ये ततो देवीं पूजयेत्साधकोत्तमः॥ १९॥
प्राणायामं ततः कृत्वा यथाशक्तिजपं चरेत्।
गुह्यादिकं जपफलं देव्या हस्ते निवेदयेत्॥ २०॥
प्राणायाम ततः त्वा प्रणामाष्टाङ्गमाचरेत्।
अथोत्थाय महेशानि विशेषार्घ्यं निवेदयेत्॥ २१॥
आत्मसमर्पणं कृत्वा विहरेच्चा यथेच्छया।
किञ्चिन्नैवेद्यं स्विकृत्य निर्माल्यं धारयेत्ततः॥ २२।
लक्षमेकं जपेन्मन्त्रं दशांशं होममाचरेत्।
तद्दशांशं तर्पणं च अभिषेकं दशांशकम्॥ २३॥
विप्रभोजं दशांशं च ततः कुर्यात् सुरेश्वरि।
एवं त्वा महेशानि साक्षात् सुरगुरुः प्रभुः॥२४॥

तस्य हस्ते महेशानि सर्वसिद्धिर्न संशयः ।
नित्यं नित्यं महेशानि ईश्वरी यच्छते धनम् ॥ २५ ॥
लक्ष्मी सरस्वती चैव मन्दिरे निवसेत् सदा ।
इह लोके महेशानि महेन्द्रो जायते क्षितौ ॥ २६ ॥
मोक्षाकांक्षी महेशानि महामोक्षमवाप्नुयात् ।
भोगार्थी लभते भोगं यथेच्छं वर्तते चिरात् ॥ २७ ॥
इह लोके सुखं भुक्त्वा तो गच्छेद्धरेः पदम् ।
तो राजकुले भूयो जन्ममाप्नोति साधकः ॥ २८ ॥
अथाऽतः संप्रवक्ष्यामि धनदा स्तोत्रमुत्तमम् ।
यथोक्तं सर्वतन्त्रेषु इदानीं तत्प्रकाश्यते ॥ २९ ॥
नमः सर्वस्वरूपे च नमः कल्याणदायिके ।
महा संपत्प्रदे देवि धनदायै नमोऽस्तुते ॥ ३० ॥
महाभोगप्रदे देवि महाकामप्रपूरिते ।
सुखमोक्षप्रदे देवि धनदायै नमोऽस्तुते ॥ ३१ ॥
ब्रह्मरूपे महानन्दे महानन्दस्वरूपिणी ।
द्रुतसिद्धिप्रदे देवि धनदायै नमोऽस्तुते ॥ ३२ ॥
उद्यत्सूर्यप्रकाशाभे उद्यदादित्यमण्डले ।
शिवतत्त्वप्रदेदेवि धनदायै नमोऽस्तुते ॥ ३३ ॥

विष्णुरूपे विश्वमते विश्वपालनकारिणी।

महासत्त्वगुणाक्रान्ते धनदायै नमोऽस्तुते॥ ३४॥

शिवरूपे शिवानन्दे कारणानन्दविग्रहे।

विश्वसंहाररुपे च धनदायै नमोऽस्तुते॥ ३५॥

पंचतत्त्वस्वरूपे च पंचाचारसदारते।

साधकाभीष्टदे देवि धनदायै नमोऽस्तुते॥ ३६॥

इदं स्तोत्रं मया प्रोक्तं साधाभीष्टदायम्।

यः पठेत् पाठयेद्वापि स लभेत्सकलं फलम्॥ ३७॥

त्रिसन्ध्यं यः पठेन्नित्यं स्तोत्रमेतत्समाहितः।

स सिद्धिं लभते शीघ्रं नाऽत्र कार्या विचारणा॥ ३८॥

इदं रहस्यं परमं स्तोत्रं परमदुर्लभम्।

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति॥ ३९॥

अप्रकाश्यमिदं देवि गोपनीयं परात्परम्।

पठनान्नाऽत्र सन्देहो धनवान् जायतेऽचिरात्॥ ४०॥

श्रीदेव्युवाच

धनदाय महाविद्या कथिता न प्रकाशिता।

इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम्॥ ४१॥

श्रीशिव उवाच

शृणु देवि प्रवक्ष्यामि कवचं मन्त्रविग्रहम्।
सारात्सारतरं देवि कवचं यन्मयोदितम्॥ ४२॥
धनदाकवचस्यास्य कुबेर ऋषि ईरितः।
पंक्तिश्च्छन्दो देवता च धनदा सिद्धिदा सदा॥ ४३॥
धर्माथकाममोक्षेषु विनियोगः प्रकीर्तितः।
ॐ धं बीज मे शिरः पातु ह्रीं बीजं मे ललाटकम्॥ ४४॥
श्रीं बिजं मे शिरः पातु रकारं हृदि मेऽवतु।
तिकारं पातु जठरं प्रिकारं पृष्ठतोऽवतु॥ ४५॥
यैकारं जङ्घयोर्युग्मे स्वाकारं पादयोर्युग्मे।
शीर्षादि पादपर्यन्तं हाकारं सर्वतोऽवतु॥ ४६॥
इत्येत्कथितं कान्ते कवचं सर्वसिद्धिदम्।प्रपठेद्यदि॥
गुरुमभ्यर्च्य विधिवत् कवचं प्रपठेद्यदि॥ ४७॥
शतवर्षसहस्राणां पूजायाः फलमाप्नुयात्।
गुरुपूजां विना देवि न हि सिद्धिः प्रजायते॥ ४८॥
गुरुपूजापरो भूत्वा कवचं प्रपठेत्ततः।
सर्वसिद्धियुतो भूत्वा विचरेद् भैरवोपमः॥ ४९॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरःसरम्।
सोऽभीष्टफलमाप्नोति सत्यं सत्यं न स।शयः॥ ५०॥

पूजाकाले पठेद्यस्तु देवीं ध्यात्व दम्बुजे।
षन्मासाभ्यन्तरे सिद्धिर्नात्र कार्या विचारणा॥ ५१॥
साय।काले पठेद्यस्तु स शिवो नात्र संशयः।
भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि॥ ५२॥
पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा।
सर्वसिद्धियुतो भूत्वा धनवान् पुत्रवान् भवेत्॥ ५३॥
इदं कवचमज्ञात्वा यो जपेद् धनदां शुभो।
स शत्रुघातमाप्नोति सोऽचिरान्मृत्यमाप्नुयात्॥ ५४॥
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति।
तत्र तत्र महादेवि स पूज्यो नात्र संशयः॥ ५५॥
समाप्तं कवचं देवि किमन्यच्छ्रोतुमिच्छसि।
श्रीदेव्युवाच
अहो पूज्य महादेव संसारार्णवतारक॥ ५६॥
सर्वयोगमयस्त्वं हि शरणागतवत्सल।
केनोपायेन देवेशि शीघ्रं सिद्धा भवन्ति हि॥ ५७॥
तत्सर्वं श्रोतुमिच्छामि कथ्यतां परमेश्वर।
श्रिशिव उवाच
प्रेतभूमौ तु सप्ताहं प्रत्यहं परमेश्वरि॥ ५८

दिक्सहस्त्रं जपेद्विद्यां तदा सिद्धिर्न संशयः।
अथवा परमेशानि शवमानिय यत्नतः॥ ५९॥
वितस्तिमात्रपाते तु पातजं हरमन्दिरे।
अमावस्यां समारभ्य यावच्छुक्लाष्टमी भवेत्॥ ६०॥
प्रत्यहं प्रजपेद्विद्यां गजान्तकसहस्त्रकम्।
तदा सिद्धा भवेद्देवि नान्यथा शिवभाषितम्॥ ६१॥
यदेत्कथितं सर्वं तत्त्वज्ञाने सुरेश्वरि।
तत्त्वज्ञानं विना देवि न हि सिद्धिः प्रजायते॥ ६२॥
अथवा परयत्नेन केवलं शक्तियोगतः।
पूर्वं चतुष्टयं देवि समानीय प्रयत्नतः॥ ६३॥
तस्यै दत्त्वा स्वयं पीत्वा प्रजपेद्यदि साधकः।
तदा सिद्धिं लभेद्देवि सत्यं सत्यं न संशयः॥ ६४॥
यत्र यत्र विनिर्दिष्टं जपं कार्यं सुरेश्वरि।
तत्र तत्र महेशानि गजान्तक सहस्त्रकम्॥ ६५॥

दशमः पटलः

श्रीदेव्युवाच

मातंगी तु महेशानि त्रैलोक्येषु सुदुर्लभा।

मन्त्ररूपेण देवेशि कथयस्व मयि प्रभो ॥ १ ॥

श्रिशिव उवाच

शृणु चार्वङ्गिसुभगे मातंगीमन्त्रमुत्तमम् ।

प्रणवं च समुधृत्य महामायां समुद्धरेत् ॥ २ ॥

कामबीजं समुद्धृत्य कूर्चबीजं समुद्धरेत् ।

मातंगी ङेयुता पश्चादस्त्रमन्त्रं समुद्धरेत् ॥ ३ ॥

वह्निजायान्वितो मन्त्रः सर्वन्त्रेषु पूजितः ।

सार्द्धं दशाक्षरी विद्या ब्रह्मादिपरिपूजिता ॥ ४ ॥

अस्य विज्ञानमात्रेण पुनर्जन्म न विद्यते ।

कामतुल्यश्च नारीणां रिपूणां शमनोपमः ॥ ५ ॥

कुबेर इव वित्ताढ्यो धरणीसदृशः क्षमः ।

मन्त्रस्यास्य ऋषिः प्रोक्तो दक्षिणामूर्तिरवयः ।

विराट् छन्दो महेशानि मातङ्गी देवता स्मृता ॥ ६ ॥

धर्म-अर्थ-काममोक्षेषु विनियोगः प्रकीर्तितः ।

ध्यानपूजादिकं सर्वं यामले च पुरोदितम् ॥ ७ ॥

तस्याःस्तोत्रं महापुण्यं सावधानावधारय ।

उद्यदादित्य संकशां नयनत्र्य भूषिताम् ॥ ८ ॥

भक्तानां वरदां देवीं मातंगीं तां नमाम्यहम् ।

श्यामवर्णां महादेवीं सर्वालंकारभूषिताम्॥ ९॥

द्रुतसिद्धिप्रदां दिव्यां मातंगीं तां नमाम्यहम्।

मुक्ताहारलतावल्यां नानामणिविराजिताम्॥ १०॥

कोटिविद्युत्प्रतीकाशां मातंगीं तां नमाम्यहम्।

वरदां वर्णवरदां वरमालां च धारिणीम्॥ ११॥

दैत्यदानवसंहंत्रीं मातंगीं तां नमाम्यहम्।

किंकिणीनरहस्तोभ्यः कटिदेशसुशोभिताम्॥ १२॥

पट्टवस्त्रपरीधानां मातंगीं तां नमाम्यहम्।

सौदामिनीसमाभासां नानालंकारसंयुताम्॥ १३॥

इन्द्रादिदेवतासेव्यां मातंगीं तां नमाम्यहम्।

शुद्धकाञ्चनसंयुक्तचरणांगुलिराजिताम्॥ १४॥

माणिक्यरत्नसंयुक्तां मातंगीं तां नमाम्यहम्।

दिङ्मुखे दशचन्द्राढ्यां सुधावर्षणकारिणीम्॥ १५॥

देववृन्दसमायुक्तां मातंगीं तां नमाम्यहम्।

इदं स्तोत्रं मया प्रोक्तं साधकाभीष्टदायकम्॥ १६॥

त्रिसन्ध्यं यः पठेन्नित्यं तस्य सिद्धिरदूरतः।

पूजाकाले सकृद् वापि यः पठेस्स्तोत्रमुत्तमम्॥ १७॥

तं सवितं विलोक्यैव कुबेरोऽपि तिरस्कृतः।

यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन॥ १८॥

प्रकाशत् सिद्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत्।

स्तोत्रं समाप्तं देवेशि कवचं नु वल्लभे॥ १९॥

श्रीदेव्युवाच

देवदेव महादेव जगन्निस्तारकारक।

मातंगीकवच नाथ श्रोतुमिच्छामि साम्प्रतम्॥ २०॥

यां समाराध्य देवेश धनेशोऽभूद् धनाधिपः।

यामाराध्य महादेव वासवास्त्रिदशेश्वरः॥ २१॥

ब्रह्मा विष्नु महारुद्राः यामाराध्य सुरेश्वरीम्।

सृष्टिस्थितिलियादीनां कर्त्तारो जगदीश्वराः॥ २२॥

तस्यास्तु कवचं दिव्यं कथयस्वानुकंपया।

श्रीशिव उवाच

शृणु देवि प्रवक्ष्यामि मातंगीकवचं शुभम्॥ २३॥

तव स्नेहान्महेशानि कवचं ब्रह्मरूपकम्।

त्रैलोक्यरक्षणस्यास्य दक्षिणामूर्तिसंज्ञकः॥ २४॥

ऋषिश्छन्दो विराड् देवी मातंगी देवता स्मृता।

धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः॥ २५॥

ॐ बिजं मे शिरः पातु ह्रीं बीजं मे ललाटकम्

क्लीं बीजं चक्षुषोः पातु हूं नासां परिरक्षतु ॥ २६ ॥
माकारं वदनं पातु तकारं कण्ठमेव च ।
ङ्ग्यैकारं स्कन्धदेशं मे फकारं बाहुयुग्मकम् ॥ २७ ॥
टकारं हृदयं पातु स्वाकारं स्तनयुग्मकम् ।
पृष्ठदेशे तथा नाभिः जठरं लिंगदेशकम् ॥ २८ ॥
पादद्वन्द्वं च सर्वांगं हाकारं परिरक्षतु ।
सार्द्धा दशाक्षरी विद्या सर्वांगं परिरक्षतु ॥ २९ ॥
इद्रो मां पातु पूर्वे च वह्निकोणेऽतलोऽवतु ।
यमो मां दक्षिणे पातु नै ऋत्यां नि ऋतिश्च माम् ॥ ३० ॥
पश्चिमे वरुणः पातु दायव्यां पवनोऽवतु ।
उत्तरे धनदः पायादैशान्यामीश्वरः सदा ॥ ३१ ॥
ऊर्ध्वं ब्रह्मा सदा पातु अधश्चानन्त एव च ।
रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु ॥ ३२ ॥
तत्सर्वं रक्ष मे देवि मातंगी सर्वसिद्धिदा ।
इति ते कथितं देवि कवचं परमाद्भुतम् ॥ ३३ ॥
त्रिसन्ध्यं यः पठेन्नित्यं स साक्षाच्छङ्करः स्वयम् ।
पुष्पाञ्जल्यष्टकं दत्त्वा मूलेनैव पठेत् सकृत् ॥ ३४ ॥
शतवर्षसहस्राणां पूजायाः फलमाप्नुयात् ।

भुर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ॥ ३५ ॥
सर्वसिद्धियुतः सोऽपि सर्वसिद्धितपो युतः ।
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं प्राप्य पार्वति ॥ ३६ ॥
माल्यानि कुसुमान्येव भवन्त्येव न संशयः ।
न देयं परशिष्येभो ह्यभक्तेभ्यो विशेषतः ॥ ३७ ॥
देयं शिष्याय शान्ताय ह्यनथा पतनं भवेत् ।
प्रातःकाले पठेद्यस्तु गुरुपूजापुरःसरम् ॥ ३८ ॥
कुबेर इव वित्ताढ्यो जायते मदनोपमह् ।
सायंकाले पठेद्यस्तु ध्यात्वा देवीं हृदम्बुजे ॥ ३९ ॥
सर्वसिद्धियुतो भूत्वा विचरेद् भैरवो यथा ।
गुरुपूजायुतो भूत्वा कवचं प्रपठेद्यदि ॥ ४० ॥
लक्ष्मी सरस्वती चैव निवसेन्मन्दिरे मुखे ।
इदं कवचमज्ञात्वा मातंगीं यदि वा जपेत् ॥ ४१ ॥
इह लोके दरिद्रः स्यान्मृतेः शूकरतां व्रजेत् ।
समाप्तं कवचं देवि शृणु मे प्राणवल्लभे ॥ ४२ ॥
षट्सहस्त्रं जपेन्मन्त्रं दशांशं होमयेत् सुधीः ।
ब्रह्मवृक्षोद्भवैः काष्ठैर्होमात्सर्वसमृद्धिदः ॥ ४३ ॥
तर्पणं चाभिषेकं च दशांशमाचरेत्सुधीः ।

तद्दशांशं महेशानि कुर्याद् ब्राह्मणभोजनम् ॥ ४४ ॥
ततः सिद्धो भवेन्मन्त्री नान्यथा मम भाषितम् ।
सकृत्कृते परेशानि यदि सिद्धिर्न जायते ॥ ४५ ॥
पुनस्तथैव कर्वव्यं ततः सिद्धिर्भवेद् ध्रुवम् ॥ ४६ ॥

एकादशः पटलः

श्रीदेव्युवाच

विश्वकर्ता विश्वहर्ता विश्वसंसारतारक ।
त्वां विना संशयेच्छेत्ता नहि त्राता च कुत्रचित् ॥ १ ॥
वैष्णवेशु च शैवेषु शाके सौरगणेऽपि च ।
सर्वत्र विहितां मालां वद मे परमेश्वर ॥ २ ॥

श्रि ईश्वर उवाच

अक्षमाला महेशानि पंचाशद्वर्णरूपिणी ।
अकारादिमहेशानि क्षकारान्ता यतः प्रिये ॥ ३ ॥
अक्षमाला ततः ख्याता सर्वत्रप्रपूजिता ।
अस्या जपनमात्रेण महामोक्षभवाप्नुयात् ॥ ४ ॥

श्रीदेव्युवाच

योगमालाजपो देव सर्वयोगेश्वर प्रभो ।

देहमध्यस्थितां मालां पंचाशद्वर्णरूपिणीम् ॥ ५ ॥

तां विहाय महादेव अस्थिमालां जपेत्कथम्

दीक्षितस्य च यच्चास्ति तद्वर्जं वा कथं प्रभो ॥ ६ ॥

यस्य छायादि संयोगादशुद्धो जायते पुमान् ।

तस्यास्थि च समानीय सर्वांगे भूषणं कथम् ॥ ७ ॥

श्रीशिव उवाच

शक्तिं च मन्त्रपूत च ब्राह्मणादीन् सुरेश्वरि ।

वर्जयित्वा प्रयत्नेन शृणु मत्प्राणवल्लभे ॥ ८ ॥

कुर्याच्छवं तथा मालां मुण्डं श्मशानमेव च ।

प्रणवं निष्कलं साक्षाद् ब्रह्मविष्णुशिवात्मकम् ॥ ९ ॥

प्रणवं प्रजपेद्यस्तु स साक्षाद् विष्णुरूपधृक् ।

ॐकारात्सर्ववर्णानि  जायन्ते नात्र संशयः ॥ १० ॥

ॐकारं त्रिगुणं देवि गुणातीतं च निष्कलम् ।

गुरुवक्रान्महामन्त्रं प्राप्नोति चैव मानवः ॥ ११ ॥

सर्ववर्णो महेशानि प्रणवो ब्रह्मरूपधृक् ।

अत एव महेशानि प्रणवो ब्रह्मरूपकः ॥ १२ ॥

स्त्रीशुद्रयोः परेशानि प्रणवे नाधिकारिता ।

तज्जातश्चैव चाण्डालः सर्वमन्त्रविवर्जितः ॥ १३ ॥

मन्त्राहीनस्तु अस्थ्यादि सर्ववर्णादिभूषितः।

अकारादि क्षकारान्ता अस्थिमध्ये स्थिताः सदा॥ १४॥

तिलार्धे चास्थिमध्ये च पंचाशद्वर्णरूपिणी।

अत एव बहिःकण्ठे ग्रीवायां च तथा करे॥ १५॥

सर्वत्राऽहं परेशानि महाशंखबिभूशितः।

महाशंखस्य मालायां यो जपेत्साधकोत्तमः॥ १६॥

अणिमादि विभूतीनामीश्वरो नात्र संशयः।

सर्ववर्णमयी माला सर्वदेवेषु योजिता॥ १७॥

वर्णहीनं नास्ति मन्त्रं कदाचिदपि पार्वति।

महाशंखं महेशानि सर्ववर्णविभूषितम्॥ १८॥

अत एव महाशंखं सर्वतन्त्रेषु योजितम्।

यदि भाग्यवशाद्देवि महाशंखं हि लभ्यते॥ १९॥

स सिद्धः स गणः सोऽपि स हि विष्नुर्न संशयः।

तदेव सहसा सिद्धिर्नात्र कार्या विचारणा॥ २०॥

गोपुच्छसदृशीं कुर्यादथवा सर्वरूपिणीम्

स्थूलाच्च सूक्ष्मपर्यन्तं क्रमेण ग्रथनं चरेत्॥ २१॥

मूलेन ग्रथनं कार्यं प्रणवेनाथवा प्रिये।

ब्रह्मग्रन्थिं प्रयत्नेन दद्यात्साधकसत्तमः॥ २२॥

सूत्रद्वयं परेशानि मिलितं कारयेत्ततः।
मेरोश्च ग्रथनं कार्यं तदन्ते ग्रन्थिसंयुतम्॥ २३॥
समीपे गुरुदेवस्य संस्कारमाचरेत् सुधीः।
स्थूलावधि जपेन्मन्त्रं सूक्ष्मभागे समापयेत्॥ २४॥
पुच्छावधि जपाद्देवि सिद्धिहानिः प्रजायते।
शिरसि ध्यात्वा जपेन्मालां गुरुध्यानपुरःसरम्॥ २५॥
संजप्य मालां भुजगेन तुल्यां कथाप्रसंगेन इव प्रदा स्यात्।
जपेत्सदाङ्गं लभते तवाङ्गं प्रदिप्य कात्यायनि कामनादम्॥ २६॥

द्वादशः पटलः

श्री पार्वत्युवाच

देवदेव महादेव संसारार्णवतारक।
वेदमातेति विख्याता गायत्रीं च कथं भवेत्॥ १॥

श्री शिव उवाच

शृणु देवि प्रवक्ष्यामि गायत्रीं प्रणवाक्षरीं।
वेद्मातेति विख्याता सर्वतन्त्रेषु पूजिता॥ २॥
हलाहलं समुद्धृत्य नादान्त्याक्षरमुद्धरेत्।
वामकर्णयुतं त्वा पुनर्नाभिं समुद्धरेत्॥ ३॥

कर्णयुक्तं मूर्ध्निरेफं ततश्च सुरवन्दिते ।
वारुण्यं रसनायुक्तं चन्द्रबीजं ततः परम् ॥ ४ ॥
नान्युक्तं भर्गयुक्तं देवं व्याहृतिमुद्धरेत् ।
तत्पदं च समुद्धृत्य सवितुस्तदनन्तरम् ॥ ५ ॥
वरेण्यमिति चोच्चार्य भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् प्रणवं तदनन्तरम् ॥ ६ ॥
इति जप्ता महेशानि साक्षान्नारायणो भवेत् ।
धियो यो मध्यभागे च षकारद्वयमेव च ॥ ७ ॥
अत एव महेशानि अनन्तश्रुतिरेव च ।
इति जप्त्वा महेशानि युक्तो भवति तत्क्षणात् ॥ ८ ॥
अन्त्यषकारयोर्मध्ये योकार इति यः पठेत् ।
स चाण्डाल इति ख्यातो ब्रह्महत्या दिने दिने ॥ ९ ॥
अत एव महेशानि तव स्नेहात् प्रकाशितम् ।
लक्षं जप्त्वा तु तां देवीं गायात्रिं प्रणवाक्षरीम् ॥ १० ॥
सर्वसिद्धिश्वरो भूत्वा देववद् विहरेत् क्षितौ ।
विद्यते हद्गृहे देवि तन्त्रमेतत्सुधामयम् ॥ ११ ॥
तद्गृहं परमेशानि कैलाससशं सदा ।
नित्यं च पूजयेत्तन्त्रं स सिद्धो नात्र संशयः ॥ १२ ॥

नित्यं नित्यं महेशानि यः स्पृशेत्तन्त्रमुत्तमम्।
स पूतः सर्वपापेभो ह्यन्ते शिवमयो भवेत्॥ १३॥
यो लिखेच्चेदिमं तन्त्रं शिवगम्यं सुधातम्।
गंगास्नानसमं पुण्यमन्ते शिवमाप्नुयात्॥ १४॥
यश्चैव पठते नित्यं तन्त्रराजमिदं शुभम्।
स सर्वं दुष्कृतीं स्तीर्त्वा अन्ते देवीपदं व्रजेत्॥ १५॥